# Tirupputkuzhi Sri Vijayaraghava Mangalam

## श्रीगृध्रपुष्करिणीक्षेत्र

## श्री विजयराघव मङ्गळम् ।

श्रीमत्सत्यव्रतक्षेत्रे वेगवत्यास्तटे शुभे ।
श्रीमत् गृध्रसरस्तीरे सुखासीनाय मङ्गळम् ॥
श्रीजटायोः पूजयित्रे महानन्दकराय च ।
भृगवे मुनये सर्वकामदायास्तु मङ्गळम् ॥
पुत्राद्यभीष्ट दायिन्या वल्ल्या मरकताख्यया ।
संश्लिष्टाय सुमुदगैश्च तोषयित्रे सुमङ्गळम् ॥
दक्षिणे भूसमेताय वामे लक्ष्म्या समेयुषे ।
शठारि भक्त कलिजित्सूरिवन्द्याय मङ्गळम् ॥
श्रीयादवप्रकाशाख्यात्पठन्तं लक्ष्मणं गुरुम् ।
सगोविन्दं धृष्टवते दर्शनायास्तु मङ्गळम् ॥
श्रीमद्वेङ्कटयात्रायां पहुवारं सहानुजम् ।
श्रीमद्रामानुजाचार्यैः सेवितायास्तु मङ्गळम् ॥
गुरुपङक्ति प्रभावाख्य महाग्रन्थ प्रदायिना ।
सूरिणा सादरं नित्यं सेवितायास्तु मङ्गळम् ॥
वेदान्ताचार्य वर्यैश्च परमार्थ स्तुतौ भृशम् ।
स्तुताय प्रणवायास्तु पार्थसूताय मङ्गळम् ॥
रामानुजगुरोर्भूयोऽवतारेण सुधीमता ।
सौम्योपयन्तृ मुनिना सेवितायास्तु मङ्गळम् ॥
अद्यापि सर्वलोकानां योगक्षेमवहाय च ।
अस्मत् भोग्याय विजयराघवायस्तु मङ्गळम् ॥